## अमावास्याया वा । (३०/१४०३)

अमावास्याशब्दाद् वुन् प्रत्ययो भवति [1]वा तत्र जातः इत्येतस्मिन् [2]विषये । 'सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्' (४.३.१६/१३८७) इत्यादिषु पाठात् अणोऽपवादः । [3]अमावास्यकः, आमावास्यः । एकदेशविकृतस्यानन्यत्वाद-मावस्यशब्दादपि भवति । अमावस्यकः, [4]आमावस्यः ॥

## अ च । (३१/१४०४)

अमावास्याशब्दात् अकारः [5]प्रत्ययो भवति 'तत्र जातः' (४.३.२५/१३९३) इत्येतस्मिन् विषये । पूर्वेण वुन्नणोः प्राप्तयोः अयं तृतीयः [6]प्रत्ययो विधीयते । अमावास्यः, अमावास्यकः, अमावास्यः । [7]अमावस्यः, अमावस्यकः, आमावस्यः ॥

## सिन्ध्वपकराभ्यां कन् । (३२/१४०५)

सिन्धुशब्दाद् अपकरशब्दाच्च कन् प्रत्ययो भवति 'तत्र जात' (४.३.२५/१३९३) इत्येतस्मिन् [8]विषये । सिन्धुशब्दः कच्छादिः, ततोऽणि [9]मनुष्यवुञि च (४.२.१३३,१३४/१३५७,१३५८) प्राप्ते [10]विधानम् । [11]अपकरशब्दाद् [12]अपि औत्सर्गिकेऽणि । सिन्धुकः । अपकरकः ॥

## अणञौ च । (३३/१४०६)

सिन्ध्वपकरशब्दाभ्यां यथासङ्ख्यम् अणञौ प्रत्ययौ भवतः 'तत्र जातः' (४.३.२५/१३९३) इत्येतस्मिन् विषये । पूर्वेण कनि प्राप्ते वचनम् । सैन्धवः । आपकरः ॥

## श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् । (३४/१४०७)

श्रविष्ठादिभ्यः शब्देभ्यः [13]नक्षत्रेभ्यः आगतस्य[14] (४.२.३/१२०४) जातार्थे लुग् भवति । तस्मिन्[15] स्त्रीप्रत्ययस्यापि 'लुक् तद्धितलुकि' (१.२.४९/१४०८) इति[16] भवति । श्रविष्ठासु जातः श्रविष्ठः । फल्गुनः । अनुराधः । स्वातिः । तिष्यः । पुनर्वसुः । हस्तः । विशाखः । अषाढः । बहुलः ।

[४५०] लुक्प्रकरणे चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसङ्ख्यानम् । (म.भा. २.३०७)

चित्रायां जाता चित्रा । रेवती । रोहिणी । स्त्रीप्रत्ययस्य लुकि कृते गौरादित्वात् (४.१.४१/४९८) ङीष् ।

[४५१] फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ । (म.भा. २.३०८)

'फल्गुनी' (तै. सं. २.१.२.२) । 'अषाढा' (तै. सं. ४.४.१०.२) ।

[४५२] श्रविष्ठाषाढाभ्यां छणपि[17] वक्तव्यः । (म.भा. २.३०८)

[18]श्राविष्ठीयः । [19]आषाढीयः[20] ॥

---

1. वा नास्ति ब.फ. 2. अर्थे फ. 3. आमावास्यकः ब. 4. अमावास्यः क. इ. 5. च इत्यधिकम् फ. 6. प्रत्ययः नास्ति इ.क. 7. एतानि त्रीणि उदाहरणानि न सन्ति फ. 8. अर्थे क. 9. मनुष्यतत्स्थयोः फ. 10. वचनं ब.फ. 11. अपकरे क. 12. अथ ब. 13. नक्षत्राणः ब.क. 14. प्रत्ययस्य इत्यधिकम् क. 15. कृते इत्यधिकम् ब.क.इ.फ.ह. 16. लुक् इत्यधिकम् ब.फ. 17. अपि नास्ति फ. 18. श्रविष्ठीयः क. 19. आषाढीयः नास्ति फ. 20. एण्यस्यापवादः । पकारः स्वरार्थ । प्रावृषि जातः प्रावृषिकः इत्यधिकम् इ.